# स्वरमेलकलानिधिः

## श्री रामामात्यविरचितः

*(Typeset using DēvanāgariTEX and pdfLATEX)*

© *August 2006*

# १ उपोद्घातप्रकरणम्

रामामात्यप्रणीतेऽस्मिन् स्वरमेलकलानिधौ ।
उपोद्घातप्रकरणं स्वरप्रकरणं ततः ॥ १ ॥

वीणाप्रकरणं चातो मेलप्रकरणं परम् ।
रागप्रकरणं चेति पंचप्रकरणानि हि ॥ २ ॥

उपोद्घातप्रकरणानंतरं राममंत्रिणा ।
तत्र स्वरप्रकरणे द्वितीये प्रतिपाद्यते ॥ ३ ॥

गीतप्रशंसा गंधर्वगानभेदा स्ततःपरम् ।
स्थानानि श्रुतयः शुद्धाः स्वरश्च विकृता अपि॥ ४ ॥

अथ वीणाप्रकरणे तृतीये प्रतिपाद्यंते ।
वीणाप्रशंसा वीणाया मेलनप्रक्रिया ततः ॥
प्रमाणकरणं शुद्धविकृतस्वरसंहतेः ॥ ५ ॥

शुद्धमेलाख्यवीणादौ मध्यमेलाह्वया ततः ।
तृतीयाच्युतराजेन्द्रमेलवीणेति लक्षिता ॥ ६ ॥

अथ मेलप्रकरणे तुरीये प्रतिपाद्यते ।
मेलानां विंशतिर्भेदा रागास्तन्मेलसंभवाः ॥ ७ ॥

उत्तरेतु प्रकरणे पंचमे प्रतिपाद्यते ।
रागाणां च त्रयो भेदा उत्तमाधममध्यमाः ॥ ८ ॥

उत्तमानां मध्यमानां रागाणां लक्षणं ततः ।
अधमानां तु केषांचिदेतावान् वस्तुसंग्रहः ॥ ९ ॥

॥ इति श्रीमदभिनवभरताचार्यवाग्गेयकारतोडरमल्ल-
तिम्मामात्यनंदनरामामात्यनिर्मिते
स्वरमेलकलानिधौ
उपोद्घातप्रकरणं संपूर्णम् ॥

# २ स्वरप्रकरणम्

सामवेदादिदं गीतं संजग्राह पितामहः ।
गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ॥ १ ॥

गोपीपतिरनंतोऽपि गीतध्वनिवशंगतः ।
सामगीतरतो ब्रह्मा वीणासक्ता सरस्वती ॥ २ ॥

किमन्ये यक्षगंधर्वदेवदानवमानवाः ॥ ३ ॥

अज्ञातविषयास्वादो बालः पर्यंकिकातले ।
रुदन् गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते ॥ ४ ॥

वनेचरस्तृणाहारश्चित्रमृगशिशुः पशुः ।
लुब्धो लुब्धकसंगीते गीते यच्छति जीवितम् ॥ ५ ॥

कृष्णसर्पोऽपि तद्गीतं श्रुत्वा हर्षं प्रपद्यते ।
तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते ॥ ६ ॥

गांधर्वस्वरसंदर्भो गीतामित्यभिधीयते ।
गांधर्वं गानमित्यस्य भेदद्वयमुदीरितम् ॥ ७ ॥

अनादिसंप्रदायं यद्गंधर्वैः संप्रयुज्यते ।

नियतं श्रेयसो हेतुस्तद्गांधर्वं प्रचक्षते ॥ ८ ॥

यत्तु वाग्गेयकारेण रचितं लक्षनान्वितम् ।
देशीरागादिभिः प्रोक्तं तद्गानं जनरंजनम् ॥ ९ ॥

तत्र लक्ष्मानुरोधेन गांधर्वं संप्रयुज्यते ॥ १० ॥

यत्र लक्ष्मपारित्यागे प्रत्यवायो न विद्यते ।
तस्माल्लक्ष्यप्रधानं तन्नतु लक्ष्मप्रधानकम् ॥ ११ ॥

परित्यागेऽत्र लक्ष्यस्य रंजनं नैव जायते ।
तस्माल्लक्ष्मादरोधेन गानं लोके प्रवर्तते ॥ १२ ॥

सर्वसंगीतशास्त्रार्थवेदिना शार्ङ्गसूरिणा ।
गीते लक्ष्यप्रधानत्वं वाद्याध्याये निरूपितम् ॥ १३ ॥

यद्वा लक्ष्यप्रधानानि शास्त्राण्येतानि मन्वते ।
तस्मालक्ष्यविरुद्धं यत्तच्छास्त्रं नेयमन्यथा ॥ १४ ॥

आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः ।
देहस्थं वन्हिमाहन्ति सप्रेरयति मारुतम् ॥ १५ ॥

ब्रह्मग्रंथिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कंठमूर्धास्येष्वाविर्भावयते ध्वनिम् ॥ १६ ॥

नादोऽतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।
इति पंचाभिधां धत्ते पंचस्थानस्थितः क्रमात् ॥ १७ ॥

व्यवहारे त्वसौ त्रेधा हृदि मंद्रोऽभिधीयते ।
कंठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥ १८ ॥

तस्य द्वाविंशतिर्भेदाः श्रवणात् श्रुतयो मताः ।

हृदभ्यंतरसंलग्ना नाड्यो द्वाविंशतिर्मताः ॥ १९ ॥

तिरश्चस्तासु तावत्यः श्रुतयो मारुताहताः ।
उच्चोच्चतरतायुक्ताः प्रभवंत्युत्तरोत्तरम् ॥ २० ॥

एवं कंठे तथा शीर्षे हृदि द्वाविंशतिर्मताः ॥ २१ ॥

श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः ।
पंचमो धैवतश्चाथ निषाद इति सप्त ते ॥
तेषां संज्ञाः स रि ग म प ध नीत्यपरा मताः ॥ २२ ॥

श्रुत्यनंतरभावी यः स्निग्धोऽनुरणनात्मकः ।
स्वतो रंजयति श्रोतृचित्तं स स्वर उच्यते ॥ २३ ॥

सुव्यक्तमेव वीणायामस्यार्थस्य निदर्शनं ॥ २४ ॥

तत्र तुर्यश्रुतौ षड्जः सप्तम्यामृषभो मतः ।
ततो नवम्यां गांधारस्त्रयोदश्यां तु मध्यमः ॥ २५ ॥

पंचमः सप्तदश्यां तु धैवतो विंशतिश्रुतौ ।
द्वाविंश्यां तु निषादः स्यात् श्रुतिष्वित्थं स्वरोद्भवः ॥ २६ ॥

ननु श्रुतिश्चतुर्थ्यादिरस्त्वेवं स्वरकारणम् ।
त्र्यादीनां तत्र पूर्वासां श्रुतीनां हेतुता कथम् ॥ २७ ॥

ब्रूम स्तुर्यातृतियादिः श्रुतिः पूर्वाभिकांक्षया ।
निर्धार्यतेऽतः श्रुतयः पूर्वा अप्यत्र हेतवः ॥ २८ ॥

एते षड्जादयः सप्त स्वराः शुद्धाः प्रकीर्तिताः ।
विकृताश्चैव सप्तैवेत्येवं सर्वे चतुर्दश ॥ २९ ॥

ननु रत्नाकरे शार्ङ्गदेवेन विकृताः स्वराः ।

द्वादशोक्ताः कथं तेतु सप्तैव कथितास्त्वया ॥ ३० ॥

सत्यं लक्षणतो भेदो द्वादशानामपीष्यते ।
शुद्धेभ्यस्तत्र भेदस्तु सप्तानामेव लक्षितः ॥ ३१ ॥

आधारश्रुतिसंत्यागात् ध्वनिभेदः प्रकीर्तितः ।
पंचानां परिशिष्टानां स्वराणां विकृतात्मनाम् ॥ ३२ ॥

पूर्वस्वरश्रुतिग्राहात्वा पूर्वश्रुतिवर्जनात् ।
अपिलक्षणतो भेदे पूर्वोक्तस्वरसंहतेः ।
आधारश्रुतिनिष्ठत्वाल्लक्ष्यभेदो न विद्यते ॥ ३३ ॥

कथं न भेद इति चेत् सलक्ष्यं तन्निरूप्यते ॥ ३४ ॥

शुद्धषड्जादच्युतस्तु स षड्जो नैव भिद्यते ।
अच्युतो मध्यमः शुद्धान्मध्यमान्न भिदां भजेत् ॥ ३५ ॥

शुद्धर्षभाच्च विकृतो रिषभो न पृथग्भवेत् ।
विकृतो धैवतः शुद्धाद्धैवतान्नातिरिच्यते ॥ ३६ ॥

मध्यमश्रुत्युपादाने विकृतः पंचमस्तु यः ।
विकृताच्चैव पंचमान्नभेदं चाश्नुते ध्रुवम् ॥ ३७ ॥

तस्माच्चतुर्दशस्वेवं पूर्वोक्तेष्वेव पंचकः ।
अंतर्भूतो यतस्तस्मान्न पृथक् कथितो मया ॥ ३८ ॥

सप्तानां विकृतानां तु सोद्देशं लक्ष्म चक्ष्महे ।
च्युतः षड्जश्च्युतोमश्च च्युतः स्यात् पंचमस्तथा ॥ ३९ ॥

स्यात् साधारणगांधरोंऽतरगांधार एवच ।
स्यात् कैशिकनिषादोऽथान्यः काकलीनिषादकः ॥ ४० ॥

हित्वा चतुर्थीं स्वाधारश्रुतिं षद्जो यदा श्रुतिम् ।
तृतीयामाश्रयेदेष च्युतषद्जोऽभिधीयते ॥ ४१॥

एवं लक्षणसाम्येन च्युतमध्यमपंचमौ ।
शुद्धस्य मध्यमस्याथ गांधारः श्रुतिमाश्रितः ॥ ४२॥

स साधारणगांधरोंऽतरगांधार उच्यते ।
यो मध्यमस्य शुद्धस्य श्रुतिद्वयसमाश्रितः ॥ ४३॥

प्रथमां शुद्धषड्जस्य निषादश्चेत् श्रुतिं श्रितः ।
स कैशिकनिषादाख्यः कथितो गीतवेदिभिः ॥ ४४॥

निषादः शुद्धषड्जस्याश्रयते चेच्छ्रुतिद्वयम् ।
स काकलीनिषादः स्यादेवं सप्तापि लक्षिताः ॥ ४५॥

चतुर्दशस्वरेष्वेषु वक्ष्ये लक्ष्यानुसारतः ।
नामान्तराणि केषांचिद् व्यवहारप्रसिद्धये ॥ ४६॥

च्युतषड्जस्वरो लक्ष्ये निषादत्वेन कीर्तितः ।
च्युतषड्जनिषादाभिधानं तस्य विधीयते ॥ ४७॥

च्युतस्य मध्यमस्यापि गांधारव्यवहारतः ।
च्युतमध्यमगांधारसंज्ञाऽस्य क्रियते मया ॥ ४८॥

च्युतपंचममाचष्टे लोका मध्यमसंज्ञया ।
अस्माभिः कथ्यते सोऽतश्च्युतपंचममध्यमः ॥ ४९॥

लक्ष्येऽत्र कुत्रचिच्छुद्धगांधारस्थानमाश्रयन् ।
ऋषभः कीर्त्यतेऽस्माभिः पंचश्रुत्यृषभाह्वयः ॥ ५०॥

स साधारणगांधारर्स्थानस्थो रिषभो यदि।

लक्ष्यनुसारतः प्रोक्तस्ततषषट्श्रुतिरेव सः ॥५१॥

अथानुवादः क्रियते क्रमादुक्तस्वरावलेः ।
वक्ष्यमाणेऽग्रतो रागमेलने सुखबुद्धये ॥५२॥

शुद्धाः सप्तस्वराः शुद्धपूर्वया तत्तदाख्यया ।
विज्ञेयः क्रमशः शुद्धषड्जः शुद्धर्षभस्ततः ॥५३॥

शुद्धगान्धार इत्युक्तः शुद्धमध्यम इत्यपि ।
शुद्धपंचम इत्येवं शुद्धधैवत इत्यपि ॥५४॥

ततः शुद्धिनषादश्चेत्येवं सप्तस्वराभिधाः ।
विकृताः सप्त कथ्यन्ते च्युतषद्जानिषादकः ॥५५॥

च्युतमध्यमगांधारश्च्युतपंचममध्यमः ।
स साधारणगांधारः स्यात्कैशिकिनिषादकः ॥५६॥

स्यात् काकलिनिषादश्चांतरगांधार इत्यपि ।
शुद्धगांधारके तत्र पंचश्रुत्यृषभोऽभिधा ॥५७॥

साधारणेऽपि गांधारे षट्श्रुत्यृषभनामच ।
अस्ति क्वचित् क्वचिद्रागमेलने गानसंततम् ॥५८॥

शुद्धनिषादनामान्यत् स्यात् पंचश्रुतिधैवतः ।
स्यात् कैशिकनिषादेऽन्यन्नाम षट्श्रुतिधैवतः ॥५९॥

चतुर्दशस्वराह्येते रागे रागे भवंत्यमी ।
पर्यायेण स्वराः सप्त त्रिस्थानेनाधिकाः क्वचित् ॥६०॥

॥ इति श्रीमदभिनवभरताचार्यवाग्गेयकारतोडरमल्ल-
तिम्मामात्यनंदनरामामात्यनिर्मिते

स्वरमेलकलानिधौ
स्वरप्रकरणं संपूर्णम् ॥

# ३ मेलप्रकरणम्

एवं प्रपंचितं लक्ष्म वीणानां तिसृणामपि ।
अनंतरं प्रवक्ष्यामो रागमेलान् यथाक्रमम् ॥ १ ॥

देशभाषाप्रसिद्धेन रागनाम्ना विशेषितान् ।
तत्तद्रागप्रधानत्वान्मेलान् वक्ष्ये क्रमाधिमान् ॥ २ ॥

लक्षणम् लक्ष्यते पश्चादुद्देशः क्रियतेऽधुना ।
सर्वेषु रागमेलेषु मुखारिर्मेल आदिमः ॥ ३ ॥

ततो मालवगौलस्य मेलः श्रीरागमेलकः ।
सारंगनाटमेलश्च मेलो हिंदोलकस्यच ॥ ४ ॥

शुद्धरामक्रियामेलो देशाक्षीमेलकोऽपरः ।
मेलः कन्नडगौळस्य शुद्धनाट्याश्च मेलकः ॥ ५ ॥

आहरीमेलकश्चैव नादरामक्रियापरः ।
मेलः शुद्धवराळ्याश्च रीतिगौळस्य मेलकः ॥ ६ ॥

वसंतभैरवीसंज्ञो मेलकस्तु प्रकीर्तितः ।
केदारगौळमेलश्च हेजुज्जीमेलकस्ततः ॥ ७ ॥

मेलः सामवराळ्याश्च रेवगुप्तेश्च मेलकः ।

सामंतनाममेलश्च कांभोजीमेलकस्ततः ॥ ८ ॥

मेला विंशतिरेवैते तेषां लक्षणमुच्यते ॥ ९ ॥

शुद्धसप्तस्वरैर्युक्तो मुखारिमेलको भवेत् ।
अस्मिन् मेले मुखारी च ग्रामरागाश्च केचन ।
संमतः शुद्ध इत्येष शार्ङ्गदेवविपश्चितः ॥ १० ॥

शुद्धाः सरिमपाः शुद्धधैवतश्च ततःपरम् ।
च्युतमध्यमगान्धारश्च्युतषड्जनिषादकः ॥ ११ ॥

एतैः सप्तस्वरैर्युक्तः संमतो रागवेदिनाम् ।
मेलो मालवगौडस्य रामामात्येन लक्षितः ॥ १२ ॥

अस्मिन्मेले संभवंति ये रागास्तानथब्रुवे ।
रागो मालवगौळाख्यो ललिता बौळिका तथा ॥ १३ ॥

सौराष्ट्रो गुर्जरी मेचबौळी च फलमंजरी ।
गुंडक्री सिंधुरामक्री छायागौळः कुरंज्यपि ॥ १४ ॥

रागः कंनडबंगाल स्तथा मंगलकौशिकः ।
मलहरीत्यादिकास्ते रागाः केचिद्भवंत्यतः ॥ १५ ॥

शुद्धषड्जः पंचश्रुतीरिषभश्च तथापरः ।
स्यात्साधारणगांधारः शुद्धो पंचममध्यमौ ॥ १६ ॥

पंचश्रुतिधैवतश्च कैशिक्याख्यनिषादकः ।
एतैः सप्तस्वरैर्युक्तः श्रीरागस्य च मेलकः ॥ १७ ॥

अस्मिन्मेले संभवन्ति ये रागातानथब्रुवे ।
श्रीरागो भैरवी गौळी धन्यासी शुद्धभैरवी ॥ १८ ॥

वेलावली मालवश्रीः शंकराभरणोऽपि वा ।
आंदोली देवगांधारी मध्यमादिस्तथापरा ॥ १९ ॥

एवमाद्याश्च कतिचिद्रागा मेलोद्भवास्ततः ॥ २० ॥

पंचश्रुत्यृषभः शुद्धषड्जमध्यमपंचमाः ।
पंचश्रुतिधैवतश्च च्युतषड्जनिषादकः ॥ २१ ॥

च्युतमध्यमगान्धार एतैः सप्तस्वरैर्युतः ।
सारंगनाटमेलोऽयं रामामात्येन लक्षितः ॥ २२ ॥

तन्मेलकसमुद्भूतान् रागान् वक्ष्यामि कांश्चन ।
सारंगनाटः सावेरी तथा सारंगभैरवी ॥ २३ ॥

नटनारायणी शुद्धवसंतः पूर्वगौळकः ।
स्यात्कुंतलवराळी सा भिन्नषड्जस्तथैवच ॥ २४ ॥

नारायणीत्येवमाद्याः केचिद्रागा भवंत्यतः ॥ २५ ॥

श्रीरागमेले यल्लक्ष्म तत्स्याद्धिंदोलमेलके ।
धैवतः शुद्ध एवात्र विशेषोऽयं प्रदर्शितः ॥ २६ ॥

कांश्चित्तत्रोद्भवान् रागान् वक्ष्ये लक्षणसंगतान् ।
हिंदोलो मार्गहिंदोलो भूपालादिभिरित्यमी ॥ २७ ॥

अन्येच कतिचिद्रागाः संभवंत्यत्रमेलके ॥ २८ ॥

शुद्धाःसरिपधाश्चैव च्युतपंचममध्यमः ।
च्युतमध्यमगांधारश्च्युतषड्जनिषादकः ॥ २९ ॥

शुद्धरामक्रियामेलः स्यादेभिस्सप्तभिः स्वरैः ।
अत्र मेले संभवंति ये रागास्तानथ ब्रुवे ॥ ३० ॥

शुद्धरामक्रिया बौळी ह्यार्द्रदेशीच दीपकः ।
इत्याद्याः संभवंत्यत्र मेले रागाश्च केचन ॥ ३१॥

षट्श्रुत्यृषभकः शुद्धषद्जमध्यमपंचमाः ।
पंचश्रुतिधैवतश्च च्युतषड्जनिषादकः ॥ ३२॥

च्युतमध्यमगांधारश्चेत्येतत्स्वरसंयुतः ।
देशाक्षीमेलकः प्रोक्तो रामामात्येन धीमता ॥ ३३॥

देशाक्षीप्रमुखा रागा भवंत्यत्र क्वचित् क्वचित् ॥ ३४॥

देशाक्षी रागमेलस्य लक्षणं यदुदाहृतम् ।
मेलः कंनडगौळस्य तस्माद्भेदोऽस्ति कश्चन ॥ ३५॥

कैशिक्याख्यनिषादोऽत्र प्रयोज्यो लक्ष्यवेदिभिः ।
अस्मिंस्तु मेले संजातान् रागांल्लक्षणतो ब्रुवे ॥ ३६॥

एकः कंनडगौळाख्यस्तथा घण्टारवोऽपि च ।
शुद्धबंगालनामा च छायानाटस्ततः परः ॥ ३७॥

तथा तुरुष्कतोडीच नागध्वनिरतः परम् ।
देवक्रिया ह्येवमाद्या रागाः केचिद्भवंत्यतः ॥ ३८॥

शुद्धस्वरास्तु समपाः षट्श्रुत्यृषभधैवतौ ।
च्युतमध्यमगांधारश्च्युतषड्जनिषादकः ॥ ३९॥

स्वरैरमीभिः संयुक्तः शुद्धनाट्याश्चमेलकः ।
शुद्धनाटप्रभृत्यो रागा अतो भवंति च ॥ ४०॥

शुद्धाः समपधाश्चैव पंचश्रुत्यृषभस्तथा ।
साधारणोऽपि गान्धारश्च्युतषड्जनिषादकः ॥ ४१॥

स्वरैरमीभिः संयुक्त आहरीमेलको भवेत् ।
आहरीप्रमुखारागा भवेयुरिहमेलके ॥ ४२॥

शुद्धा समपधा रिश्च च्युतषड्जनिषादकः ।
साधारणोऽथ गान्धारः स्वरैरेभिः समन्वितः ॥ ४३॥

नादरामक्रियामेलस्तस्मिन् रागाश्चकेचन ।
नादरामक्रियामुख्याः संभवंति क्वचित् क्वचित् ॥ ४४॥

शुद्धाः सरिपधा यत्र शुद्धगांधारसंज्ञितः ।
च्युतषड्जनिषादोऽपि च्युतपंचममध्यमः ॥ ४५॥

मेलः शुद्धवराळ्याश्च तत्र शुद्धवराळिका ।
अन्ये च संभविष्यन्ति रागा देशविभेदतः ॥ ४६॥

शुद्धाः सरिगमाः पश्च पंचश्रुतिकधैवतः ।
कैशिक्याख्यनिषादश्चेत्येतैर्युक्तः स्वरैस्तु यः ॥ ४७॥

स रीतिगौळमेलः स्याद्रीतिगौळादयोऽत्र च ।
रागाः केचिद्भवंतीति संमतं गानवेदिनाम् ॥ ४८॥

च्युतमध्यमगांधारः कैशिक्याख्यनिषादकः ।
शुद्धःसरिमपा धश्च स्वरैरेभिः समन्वितः ॥ ४९॥

वसंतभैरवीमेलस्तस्मिन् रागाश्च केचन ।
वसंतभैरवीसोमरागप्रभृतयो मताः ॥ ५०॥

शुद्धाश्च समपाः पंचश्रुती चर्षभधैवतौ ।
च्युतमध्यमगांधारश्चुतषड्जनिषादकः ॥ ५१॥

केदारगौळमेलः स्यात् स्वरैरेभिः समन्वितः ।

तस्मिन् केदारगौळश्च स्यान्नारायणगौळकः ॥ ५२ ॥

एवमाद्याः संभवंति मेले रागाः क्वचित् क्वचित् ॥ ५३ ॥

मेलाः पंचदश प्रोक्ताः काकल्यंतरवर्जिताः ।
काकल्यंतरसंयुक्तान् पंचमेलान् प्रचक्ष्महे ॥ ५४ ॥

शुद्धौ च षड्जरिषबौ शुद्धाश्च मपधास्तथा ।
गांधारोऽतरसंज्ञश्च काकल्याख्यनिषादकः ॥ ५५ ॥

एतावत्स्वरसंयुक्तो हिजूजीमेलको भवेत् ।
हिजूज्याद्या भवंत्यत्र ग्रामरागाश्च केचन ॥ ५६ ॥

इत्येव शार्ङ्गदेवस्य संमतो मार्गवेदिनः ॥ ५७ ॥

शुद्धाः सरिगमाश्चाथ शुद्धौ पंचमधैवतौ ।
निषादः काकलीसंज्ञो ह्येतेः सप्तस्वरैर्युतः ॥ ५८ ॥

मेलः सामवराळ्याख्यस्तस्मिन् सामवराळिका ।
अन्ये च संभविष्यंति रागा इति विदाम् मतम् ॥ ५९ ॥

शुद्धा सरिमपाः शुद्धधनी गांधारकोंऽतरः ।
एतैः सप्तस्वरैरेवगुप्तिमेल उदाहृतः ॥ ६० ॥

तस्मिन् रागो रेवगुप्तिः शुद्धरागाश्च केचन ।
रत्नाकरीयमेलोत्थाः शार्ङ्गदेवेन लक्षिताः ॥ ६१ ॥

रिधौ षट्श्रुतिकौ चैव काकल्यंतरनामकौ ।
शुद्धाः षड्जमपा एतैः स्वरैर्युक्तो भवेद्यदा ॥ ६२ ॥

तदा सामंतमेलः स्यात् तत्र रागास्तदादयः ॥ ६३ ॥

गनीचांतरकाकल्यौ रिधौ पंचश्रुति तथा ।
शुद्धास्तु समपाश्चैव ह्येते कांभोजिमेलकः ॥ ६४ ॥

कांभोजीप्रमुखा रागा मेलेऽस्मिन् संभवंति हि ॥ ६५ ॥

लक्षिता विंशतिर्मेला गात्रे स्युर्नियता अमी ।
पक्षद्वयं तु वीणायां वक्ष्यते लक्ष्यसंमतम् ॥ ६६ ॥

ग्राहादंतरकाकल्योः स्वररूपे पृथक् पृथक् ।
पक्षोऽयं प्रथमस्तत्र मेलाः स्युर्विंशतिर्ध्रुवम् ॥ ६७ ॥

अन्तरस्य च काकल्याः स्थाने प्रतिनिधिः क्रमात् ।
च्युतमध्यमगान्धारश्च्युतषड्जनिषादकः ॥ ६८ ॥

अयं द्वितीयः पक्षोऽत्र मेलाः पंचदश स्मृताः ॥ ६९ ॥

एतदेवाभिसंधाय कथितं शार्ङ्गसूरिणा ।
अल्पप्रयोगः सर्वत्र काकली चांतरस्वरः ॥ ७० ॥

अत्र प्रतिनिधेः पक्षे मुखारिमेलपूर्वकाः ।
केदारगौळमेलान्ता मेलाः पंचदश स्मृताः ॥ ७१ ॥

॥ इति श्रीमदभिनवभरताचार्यवाग्गेयकारतोडरमल्ल-
तिम्मामात्यनंदनरामामात्यनिर्मिते
स्वरमेलकलानिधौ
मेलप्रकरणं संपूर्णम् ॥

# ४ रागप्रकरणम्

एतेषु वा मता रागा उत्तमा मध्यमा अपि ।
अधमाश्चापि सकलाः कथ्यंते ते विवेकतः ॥ १ ॥

मुखारि शुद्धनाटीच तथा मालवरागकः ।
ततः शुद्धवराळीच गुर्जरी ललितस्तथा ॥ २ ॥

शुद्धरामक्रियाशुद्धवसंतौ भैरवी तथा ।
हिंदोलरागश्रीरागौ रागः कन्नडगौळकः ॥ ३ ॥

सामंतरागो देशाक्षी धन्यासी बौळिकेतिच ।
आहरी चापि मल्लारी मालवश्री स्ततःपरम् ॥ ४ ॥

सारंगनाटीतिरागाः कथिताश्चोत्तमोत्तमाः ।
असंकीर्णतया लोके रागा विंशतिरेवच ॥ ५ ॥

गीतप्रबंधकालापयोग्या एते भवंति हि ॥ ६ ॥

केदारगौळः कांभोजी बंगालः कन्नडाह्वयः ।
वेलाख्या मध्यमादि र्नारायणी रीतिगौळकः ॥ ७ ॥

नादरामक्रिया पाडि र्भूपाली रेवगुप्तिकः ।
गुंडक्रिया हिजूजीच वसंतादिश्च भैरवी ॥ ८ ॥

रागः सामवराळिश्चेत्येते पंचदशैव च ।
लोकेऽबहुव्यवहाराः कीर्तिता मध्यमा बुधैः ॥ ९ ॥

सौराष्ट्रो मेचबौळीच छायागौळः कुरंजिका ।
सिंधुरामक्रिया गौडी देशी मंगलकौशिकः ॥ १० ॥

पूर्वगौळस्सोमराग आन्धाली फलमन्जरी ।

शंकराभरणो देवगांधारी दीपकस्तथा ॥ ११ ॥

नटनारायणी शुद्धभैरवी भिन्नषड्जकः ।
स्यात् कुंतलवराळी च रागः सारंगभैरवी ॥ १२ ॥

शुद्धबंगालको नागध्वनि र्घंटारवस्तथा ।
मार्गहिंदोलकश्छायानाटी देवक्रियापिच ॥ १३ ॥

नारायणी गौळरागस्ततस्तोडी वराळिका ।
तुरुष्कतोडीरागश्च रागः सावेरिका तथा ॥ १४ ॥

आर्द्रदेशीत्यादयश्च रागाः स्युरधमाः क्रमात् ॥ १५ ॥

सर्वेष्वेतत्पुरोक्तेषु मध्यमेषूत्तमेषुच ।
अंतर्भूताश्च संकीर्णाः पामरभ्रामकाश्चते ॥ १६ ॥

रागास्तावत् प्रबंधानामयोग्या बहुलाश्च ते ॥
तस्मान्नते परिग्राह्या रागाः संगीतकोविदैः ॥ १७ ॥

देशीरागाश्च सकलाः षड्जग्रामसमुद्भवाः ।
ग्रहांशन्यासमंद्रादिषाडवौडवपूर्णताः ॥ १८ ॥

देशीत्वात्सर्वरागेषु भवंति न भवंति वा ।
तथापि लक्ष्यमाश्रित्य लक्ष्यज्ञाननुसृत्यच ॥ १९ ॥

विंशत्युत्तमरागाणामसंकीर्णस्वरूपिणाम् ।
मध्यमानां तथा पंचदशानां च ततः परम् ॥ २० ॥

अधमानां च केषांचिल्लक्षणं लक्ष्यतेधुना ॥ २१ ॥

संपूर्णस्वरसंयुक्तः षड्जन्यासग्रहांशकः ।
यो गेयः पश्चिमे यामे नाटीरागः स उच्यते ॥ २२ ॥

षड्जांशा सग्रहा षड्जन्यासा संपूर्णतांगता ।
सर्वयामेषु या गेया सा वराळीतिकीर्तिता ॥ २३ ॥

सारंगनाटि संपूर्णा सन्यासा सग्रहापिच ।
षड्जांशा पश्चिमे यामे गातव्या कथिता बुधैः ॥ २४ ॥

शुद्धरामक्रियारागः संपूर्णः सग्रहोऽपिच ।
षड्जांशन्याससंयुक्तो गेयो मध्यंदिनात्परम् ॥ २५ ॥

सग्रहा सांशिका षद्जन्यासा संपूर्णतां गता ।
मुखारी सर्वकालेषु गानयोग्या प्रकीर्तिता ॥ २६ ॥

संपूर्णो भैरवीरागः सन्यासः सांशको मतः ।
षड्जग्रहस्तथा गेयो यामे यः पश्चिमे च सः ॥ २७ ॥

सन्यास आहरीरागः सांशः षड्जग्रहोऽपिच ।
संपूर्णश्चरमे यामे गातव्योसौ विचक्षणैः ॥ २८ ॥

सामंतरागः षड्जांशः षड्जन्यासश्च सग्रहः ।
दिनस्य चरमे यामे गेयः संपूर्णतायुतः ॥ २९ ॥

निधांशकग्रहोपेतो रागः कन्नडगौळकः ।
संपूर्णोऽपि कदाचित् स्यादारोहे त्यक्तमध्यमः ॥ ३० ॥

गेयोह्नः पश्चिमे यामे उत्कलानामतिप्रियः ॥ ३१ ॥

सन्यासः सग्रहः पूर्णो देशाक्षीराग उच्यते ।
आरोहे मनिवर्जोऽसौ पूर्वयामे च गीयते ॥ ३२ ॥

मध्यमांशग्रहन्यासा पंचमेन विवर्जिता ।
बौळिका स्यात् षाड्वा सा गातव्या पूर्वयामके ॥ ३३ ॥

रागः शुद्धवसंताख्यः सन्यासः सग्रहोऽपिच ।
गीयते सर्वयामेषु सर्वदा मंगलप्रदः ॥ ३४ ॥

पवर्जिता रिग्रहांशन्यासा षाडविका स्मृता ।
कदाचिदवरोहे सा पयुता गुर्जरी भवेत् ॥ ३५ ॥

दिनस्य प्रथमे यामे गेया सा गानकोविदैः ॥ ३६ ॥

सग्रहसन्यासयुक्ता ललिता पंचमोज्झिता ।
षाडवा प्रथमे यामे गेया सा शोभनप्रदा ॥ ३७ ॥

हिंदोलको रिधत्युक्त औडवः सग्रहांशकः ।
सन्यासः शुभयोग्ऽएपि सरागः सार्वकालिकः ॥ ३८ ॥

धैवतांशग्रहन्यासो रागो मल्लारिसंज्ञकः ।
औडवो गनिवर्जोऽसौ प्रभाते गीयते बुधैः ॥ ३९ ॥

रागो धन्यासिसंज्ञोऽसौ बहुशो रिधवर्जितः ।
गेयः प्रातरसौ तज्ज्ञैः सन्यासांशग्रहौडवः ॥ ४० ॥

रागो मालवगौळश्च निन्यासांशग्रहो मतः ।
औडवो रिपवर्जश्च कदाचिद्रिपसंयुतः ॥ ४१ ॥

गेयः सायाह्नसमये रागाणामुत्तमोत्तमः ॥ ४२ ॥

श्रीरागः सग्रहः सांशः सन्यासो गधवर्जितः ।
औडवोपि भवेद्रागः कदाचित् गधसंयुतः ।
सायान्हे गीयतामेष सर्वसंपत्प्रदायकः ॥ ४३ ॥

केदारगौळः संपूर्णो निन्यासो निग्रहोऽपिच ।
निषादांशश्चतुर्थेऽह्नि प्रहरे गीयते बुधैः ॥ ४४ ॥

नादरामक्रियारागः षड्जन्यासस्तु सग्रहः ।
षड्जांशकस्तु संपूर्णो गेयो यामे तुरीयके ॥ ४५॥

सन्यासा सग्रहा सांशा संपूर्णाऽपि क्वचित् क्वचित् ।
आरोहे मनिवर्जाऽसौ कांभोजी सायमीरिता ॥ ४५॥

षड्जांशा सग्रहा षड्जन्यासा सामवराळिका ।
संपूर्णा सर्वदा गेया सामवेदसमुद्भवा ॥ ४६॥

रीतिगौळो निषादांशो निन्यासग्रह एवच ।
संपूर्णो गीयते सायं मुखारीमेलमाश्रितः ॥ ४७॥

हिजूजीरागः संपूर्णो मन्यासो मग्रहांशकः ।
गेयोऽह्नः पश्चिमे यामे काकल्यंतरभूषितः ॥ ४८॥

गांशो नारायणीरागो गाम्धारन्यासकग्रहः ।
संपूर्णः प्रातरुद्गेयोऽवरोहे रिच्युतः क्वचित् ॥ ४९॥

पूर्णो वेलावलीरागो धन्यासस्तुचधग्रहः ।
क्वचिद्रिपाभ्यां न्यूनः स्यादवरोहे प्रभातजः ॥ ५०॥

रागः कन्नडबंगालो गान्धारग्रहकांशकः ।
गन्यासरिषभन्यूनः प्रातर्गेयः स षाडवः ॥ ५१॥

पाडीरागस्तु सन्यासः सांशः षड्जग्रहः स्मृतः ।
तुरीययामे गेयोऽसौ निर्हीनः षाडवो मतः ॥ ५२॥

वसंतभैरवीरागः सन्यासः पंचमोज्झितः ।
सग्रहः षड्जकन्यासः प्रातर्गेयः स षाडवः ॥ ५३॥

सांशो गुंडक्रियारागः सग्रहन्यासषाडवः ।

धवर्जितः पूर्वयामे गेयो धैवतयुक् क्कचित् ॥ ५४ ॥

मध्यमादिर्मग्रहांशो मन्यासो रिधवर्जितः ।
औडवः पश्चिमे यमे दिनस्य परिगीयते ॥ ५५ ॥

भूपालीरागः सन्यासः सांशः सग्रह एव च ।
मनिलोपादौडवः स्यात् प्रातः काले च गीयतै ॥ ५६ ॥

रिग्रहो रेवगुप्तिः स्याद्रिन्यासो मनिवर्जितः ।
औडवश्चरमे यामे दिवसस्य च गीयते ॥ ५७ ॥

अथाधमानां रागाणां केषांचिल्लक्ष्म कथ्यते ।
सावेरिरागो धन्यासो धांशो धग्रह एवच ॥
औडवो गनिलोपेन प्रगे गेयो विचक्षणैः ॥ ५८ ॥

घंटारवो धैवतांशो धग्रहन्यास एवच ।
गलोपात् षाडवः प्रोक्तः सर्वकाले प्रगीयते ॥ ५९ ॥

रागो नागध्वनिः पूर्णः षड्जांशः सग्रहोऽपि च ।
षड्जन्यासो गीयतेसौ सर्वदा गीतकोविदैः ॥ ६० ॥

सन्यासः सग्रहश्चैव सांशः संपूर्ण एवच ।
सोमरागः सदा गेयो मंद्रमध्यमभूषितः ॥ ६१ ॥

पंचमांशग्रहन्यास आंधोलीराग ईरितः ।
निगलोपादौडवोऽयं सर्वकाले प्रगीयते ॥ ६२ ॥
शंकराभरणो रागः संपूर्णः सांशकः स्मृतः ।
षड्जन्यासग्रहः सोयं सामंतच्छायमाश्रितः ॥ ६३ ॥

भिन्नषड्जाख्यरागोयं सग्रहः परिकीर्तितः ।
षड्जन्यासः षाडवोयं मलोपाद्गीयते सदा ॥ ६४ ॥

एवं प्रकरणोन्नेया रागाः शेषा विचक्षणैः ।
अतिसंकीर्णभावेन नास्माभिर्लक्षिताः क्वचित् ॥ ६५ ॥

गानोपयोगिनां त्वेतत्प्रबंधानां तु लक्षणम् ।
रत्नाकरे शार्ङ्गदेवसूरिणा कथितं स्फुटम् ॥ ६६ ॥

गांधर्वमखिलंचापि तत्रैव स्पष्टभीरितम् ।
तत एवावगंतव्यं तस्मान्न कथितं मया ॥ ६७ ॥

शाके नेत्रधराधराब्धिधरणीगण्येथ साधारणे
वर्षे श्रावणमासि निर्मलतरे पक्षे दशम्यां तिथौ ।
रामामात्यविनिर्मिते स्वरतते संगीतरत्नाकरात् ।
सोयं मेलकलानिधिर्मतामाकल्पमाकल्पताम् ॥ ६८ ॥

॥ इति श्रीमदभिनवभरताचार्यवाग्गेयकारतोडरमल्ल-
तिम्मामात्यनंदनरामामात्यनिर्मिते
स्वरमेलकलानिधौ
रागप्रकरणं संपूर्णम् ॥